श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - २२

# भाष्यपरम्परा ज्ञानप्रवाहश्च

(अन्ताराष्ट्रियपरिसंवादे प्रस्तुतानां निबन्धानां सङ्ग्रहः)

प्रधानसम्पादकः

**प्रो. गोपबन्धु मिश्रः**

सम्पादकाः

**प्रो. देवेन्द्रनाथ पाण्डेयः**

**डॉ. दीपेश विनोद कतिरा**

**डॉ. जानकीशरण आचार्यः**

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

Scanned with CamScanner

प्रकाशकः

डॉ. दशरथ जादवः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी,

राजेन्द्रभुवनमार्गः, वेरावलम् – ३६२ २६६ गीर-सोमनाथजनपदम् (गुजरातम्)

दूरभाषः – 02876 – 244532, फेक्स – 244417

www.sssu.ac.in

सहायकसम्पादकः समन्वयकश्च

डॉ. कार्तिक पण्ड्या

संशोधनाधिकारी

© Shree Somnath Sanskrit University, Veraval – 2020

**Note:** The statements and views expressed by the authors of articles in this conference proceeding are their own and not necessarily of the editors. The responsibility of the facts stated, opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

संस्करणम् - प्रथमम्

वर्षम् - मार्च, २०२०

प्रतिकृतयः - ३५०

ISBN - 978-93-83097-43-2

मूल्यम् - ₹ 920

मुद्रकः - जालाराम ग्राफिक्स एण्ड ऑफसेट

परमहंस एपार्टमेंट के पास, होटल कावेरी के पीछे,

एस.टी. रोड, वेरावल - ३६२ २६६.

जि. गीर सोमनाथ, गुजरात (भारत)

दूरभाष : (०२८७६) २२१८६१

Scanned with CamScanner

# आचार्यसायणस्य वैदिकभाष्यप्रवृत्तिः आलोचनासिद्धान्तश्च

डॉ. शत्रुघ्न पाणिग्राही

विजयनगरस्याधिपतिः महारजबुक्कस्य हिन्दुधर्मं प्रति विशेषानुरक्तिरासीत्। सनातनहिन्दुधर्मस्य प्राणभूतानां वेदानां प्रामाणिकव्याख्यां कर्तुं सः महारजः गुरुं तथा राजनीतिज्ञममात्यं माधवाचार्यमादिष्टवान्। आचार्यमाधवः तस्य कनिष्ठभ्राता आचार्यसायणम् अस्मिन् भाष्यकर्मणि नियोजयितुं निवेदितवान्। माधवाचर्यस्य वचनं श्रुत्वा बुक्कमहीपतिः वेदार्थप्रकाशनार्थम् आचार्यसायणम् आदिशत्। आचार्यसायणः आदौ स्वशाखायाः कृष्णयजुर्वेदस्य तैत्तिरीयसंहिताया भाष्यं कृतवान्। अनन्तरं सर्वेषां वैदिकग्रन्थानामुपरि तेन व्याख्या विहिता। विवेचनायं यदनुसंधानविधौ, साहित्यक्षेत्रे या प्रक्रिया सामान्यरूपेण, विशेषरूपेण वाश्रीयते सैव प्रक्रियास्माकं वैदिकभाष्यकर्तृभिः वैदिकमन्त्राणां भाष्यकारेणेप्याश्रीयते। अर्थात् भाष्यमपि वेदार्थस्य विशदीकरणं भवति यत्र नैके नूतनाः विषयाः भाष्यकर्तुः प्रज्ञया, व्युत्पत्तिकुशलतया विशेषप्रतिभया च प्रासङ्गिकरूपेणोद्धाटिताः जायन्ते। अत्रैतदुल्लेखनीयमस्ति यत् विविधपदयोजनामवलोक्य वैदिकमन्त्राणां भाष्यकारः कश्चित् भाष्यकर्मसहायकीभूतैः साहित्यैः सह मन्त्रगतं सङ्केतविशेषमुपगृह्य तथैवोद्धाटयति विदुषां समक्षं यथाद्य विशेषानुसंधानप्रक्रियामार्गमनुसृत्याधुनिकाः शोधार्थिनः प्रतिपादयन्ति शोधकर्मणि।

अनेन प्रकारेणैतदवगम्यते यत् आचार्यसायणस्य वैदिकव्याख्यापद्धतिरस्त्येको विशेष आविष्कारः वैदिकसाहित्यक्षेत्रे यस्य प्रणयनं चकार सायणः सर्वाणि वेदाङ्गानि सम्यगधीत्य परिशील्य च। तन्माध्यमेन केचन वेदव्याख्याधर्मान् स निर्धारयामास। यद्यपि व्याख्याधर्माः शास्त्रेषु पूर्ववत् एवासन् परन्तु स महानुभावः स्वविवेचनकौशल्येन सर्वं क्रमिकरूपेणात्र स्व 'वेदार्थप्रकाश' इति भाष्ये विस्तार्य यज्ञपरकभाष्यञ्चकार। अस्मिन् शोधपत्रे अचार्यसायणस्य मन्त्रव्याख्यायामालोचनासिद्धान्त एवञ्च भाष्यप्रवृत्तिविषये चर्चा भविष्यति। प्रथमतः मन्त्रव्याख्यायाम् आलोचनासिद्धान्तस्योपरि केचन बिन्दवः अत्र उपस्थाप्यन्ते।

Scanned with CamScanner

## १. यज्ञोन्मुखी धारा

वेदः भवति यज्ञप्रधानः। यज्ञ एव सृष्टिरचनाकार्यमुच्यते। ब्रह्माण्डस्य पिण्डस्य च स्थूल-सूक्ष्मरचनां क्रमशः परिज्ञापयितुम् अग्निहोत्र-दर्शपूर्णमास-चातुर्मासादिरूपाः विविधाः श्रौतयागाः प्रकल्पिताः सन्तीति आचार्यसायणस्य मतम्। विविधानां श्रौतयज्ञानां प्रकल्पना सृष्टिं विज्ञापयितुमेव कृता वर्तते। अग्निषोमात्मकं जगत् इति वैदिकसिद्धान्तं तस्य प्रमाणम्। जगतः कारणमेव अयं यज्ञः। अतः यज्ञः भुवनस्य नाभिरूपेण स्वीकृतः।[१] यज्ञकर्मणि अध्वर्योः प्राधान्यं दृश्यते। यः यजुर्वेदस्य ऋत्विगस्ति। एतदर्थं आचार्यसायणः वेदभाष्यकर्मणि आदौ यजुर्वेदस्य भाष्यं कृतवान्। वेदभाष्यक्रमनिर्धारणे **'ऋचां त्वः पोषमास्ते गायत्रं त्वो गायति शक्करीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः॥'**[२] इति मन्त्रव्याख्यां स्वीकृत्य ऋत्विजः कर्मानुसारं वेदभाष्यं चकार। आचार्यसायणानुसारम् ऋत्विक् कर्मणि अध्वर्योः स्थानं महत्त्वपूर्णं वर्तते। **'यज्ञस्य मात्रां विमिमीत उ त्वः'** – अर्थात् अध्वर्युनामक एक ऋत्विग् यज्ञस्य मात्रां नाम स्वरूपं विशेषेण निष्पादयति। अनन्तरं द्वितीयक्रमे होतृकर्म, तदन्तरं उद्गातृकर्म। सामवेदः ऋगाश्रीतत्वात् ऋग्वेदस्य भाष्यानन्तरं तस्य भाष्यं कृतवान्।भाष्यभूमिकायां यथा-

> **आध्वर्यस्य यज्ञेषु प्राधान्याद् व्याख्याकृतः पुरा।**
> **यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते॥**[३] इति।

अत्र विवेचनस्य विषयो भवति यदि यजुर्वेदस्य एतादृशं महत्त्वमस्ति तर्हि अन्ये ये भाष्यकाराः मनीषिणः भाष्यं कृतवन्तः ते किमर्थं यजुर्वेदस्य परिगणनमादौ न कृतवन्तः? निरुक्तकारयास्केनापि ९९प्रतिशतं मन्त्राणामुद्धरणम् ऋग्वेदतः कृतं वर्तते। स्वयं आचार्यसायणोऽपि ऐतरेयब्राह्मणस्य[४] छान्दोग्योपनिषदः[५] वचनञ्च उधृत्य ऋग्वेदस्याभ्यर्हितत्वं स्वीकृतम्। एतद् सत्वेऽपि आचार्यसायणस्य मनसि यज्ञं प्रति चिन्ता आसीत्। अतः यज्ञप्रधानयजुर्वेदस्य व्याख्यानं तेन आदौ कृतम्।

---

[१] अयं यज्ञो भुवनस्य नाभिः। शुक्लयजुर्वेदः - २०/८

[२] ऋग्वेदः – १०/७१/११

[३] सायणभाष्य- ऋग्वेदभाष्यभूमिका –पृष्ठ-१ मङ्गलाचरणम्

[४] ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात् – ऐ.ब्रा. -५/३२

[५] ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम् – छा. उप. – ७/१/२

Scanned with CamScanner

## २. वेदस्य लक्षणप्रसङ्गः

यास्कतः आरभ्य आत्मानन्दपर्यन्तं कस्यापि भाष्यकारस्य मनसि वेदस्य लक्षणप्रसङ्गे सन्देहो नासीत्। परन्तु आचार्यसायणः आदौ पूर्वपक्षरूपेण इमं प्रसंगमुत्थाप्य स्पष्टं कर्तुमिच्छति यत् तस्मिन् समये केषाञ्चन जनानां मनसि वेदस्य लक्षणप्रसङ्गे शङ्का आसीत्। अतः पूर्वपक्षमाध्यमेन स्वकीयभाष्यभूमिकायाम् आचार्यसायणः कथयति- ननु वेद एव तावन्नास्ति कुतस्तदवान्तरविशेष ऋग्वेदः ? तथा हि, कोऽयं वेदो नाम ? न हि तत्र लक्षणं प्रमाणं वास्ति। न च तदुभयव्यतिरेकेण किञ्चिद् वस्तु प्रसिध्यति। 'लक्षणप्रमाणाभ्यां हि वस्तुसिद्धि' इति न्यायविदां मतम्। प्रत्यक्षानुमानागमेषु अन्तिमो वेद इति तल्लक्षणमिति चेत् न, मन्वादिस्मृतिष्वतिव्यासेः।

सिद्धान्तपक्षरूपेण वेदस्य स्वप्रकाशकत्वमतमुपस्थापयितुं वेदभाष्यकारेण सायणाचार्येणोक्तं सूर्यो यथा स्वप्रकाशेन समग्राणि वस्तूनि बोधयति सुगम्यानि अगम्यानि च तथा वेदाः अचिन्त्यार्थस्य बोधकाः भवन्ति। घटपटादयो न स्वयं प्रकाशवन्तः, परन्तु सूर्यचन्द्रमसौ स्वयं तान् पदार्थान् प्रकाशितवन्तौ, ताभ्याम् अन्येऽपि पदार्थाः प्रकाश्यन्ते। अतः वेदाः स्वयंप्रकाशवन्तः स्वप्रतिपादकत्वशक्तियुक्ताश्च सन्ति। यथा घटपटादिद्रव्याणां स्वप्रकाशत्वाऽभावेपि सूर्यचन्द्रादीनां स्वप्रकाशत्वमविरुद्धं तथा मनुष्यादीनां स्वस्कन्धाधिरोहासम्भवेऽपि अकुण्ठितशक्तेर्वेदस्य इतरवस्तुप्रतिपादकत्ववत् स्वप्रतिपादकत्वमप्यस्ति। अतः सायणेन उक्तम् –

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥[६] इति।**

अनेन विज्ञायते यत् यानि वस्तूनि प्रत्यक्षप्रमाणेनानुमान प्रमाणेन च न विज्ञायन्ते तानि विज्ञातुं वेदे उपायो विद्यते। एतदर्थं मनु[७]-व्यास[८]-जैमिनि[९]प्रभृतयः ऋषयः वेदवाण्याः नित्यत्वं दर्शयन्ति। वेदस्य दिव्यताम् अपूर्वां शक्तिञ्च वर्णयन् मीमांसाभाष्यकारेण शबरस्वामिनोक्तम्- चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुम्।[१०]

## ३. ब्राह्मणभागस्य प्रामाण्यप्रसङ्गः

---

[६] ऋग्वेदभाष्यभूमिकायाः मङ्गलाचरणे

[७] वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे - मनुस्मृतौ -१/२१

[८] अत एव च नित्यत्वम् – ब्रह्मसूत्रम् – १/३/२९

[९] औपत्तिकस्तु शब्दस्यार्थेन सम्बन्धः – जैमिनिसूत्रम्- १/५

[१०] शाब.भाष्य-१/१/२

आचार्यसायणानुसारं वेदः द्विधा विभज्यते। मन्त्रभागः ब्राह्मणभागश्चेति[११]। परन्तु सायणः अनेकेषु स्थलेषु ब्राह्मणभागस्य महत्त्वं स्वीकरोति। तस्य मतानुसारं प्रामाणिकदृष्ट्या मन्त्रब्राह्मणयोर्मध्ये नास्ति कोऽपि भेदः। सायणस्यापौरुषेयत्वविषयकचिन्तने स्पष्टं भवति मन्त्रापेक्षया ब्राह्मणभागस्यापौरुषेयत्वं सिद्धं कर्तुं तेन प्रयत्नः कृतः। उदाहरणरूपेण तैत्तिरीयसंहिता एवञ्च ज्योतिष्टोमादियज्ञप्रसङ्गे उपसंहार रूपेण कथयति - **तस्मात् कर्तृदोषशङ्कायाः अनुदयात् मन्त्रब्राह्मणात्मकस्य वेदस्य निर्विघ्नं प्रामाण्यं सिद्धम्।**

मन्त्रभागस्य कृते तादृशी समस्या नासीत् यथा ब्राह्मणभागस्य कृते आसीत्। पुराकालादेव ब्राह्मणभागस्य वेदत्वनिरूपणे काठिन्यमासीत्। यतोहि जैमिनिरेव स्वयं ब्राह्मणभागस्य नित्यत्वानित्यत्वविषये कुत्रापि उल्लेखो न कृतः। आख्या प्रवचनात्, श्रुति तु सामान्यमात्रम्[१२] इति सूत्रानुसारं ब्राह्मणभागस्य नित्यत्वमभिप्रेतमिति वक्तुं न शक्यते। पुनश्च '**तच्चोदकेषु मन्त्राख्या, शेषे ब्राह्मणशब्दः**' इति दर्शनवचनेनापि स्पष्टं न भवति। पुनश्च लौकिकसाहित्यवत् ब्राह्मणसाहित्येऽपि ऐतिहासिकविषयाः दृश्यन्ते। अतः केचन आक्षिपन्ति यत् वैदिकपरम्परायां मन्त्रवत् ब्राह्मणभागस्य नित्यत्वम् अपौरुषेयत्वञ्च न सिद्ध्यति।

आलोचनासिद्धान्तदृष्ट्या यदि वयं चिन्तयामः तर्हि सायण एवञ्च जैमिनिः यज्ञप्रवृत्तिं स्वीकृतवन्तौ। तां प्रवृत्तिं पूरयितुं ब्राह्मणभागस्य महत्त्वपूर्णं स्थानं विद्यते। ब्राह्मणभागः मन्त्रभागस्य व्याख्यारूपोऽस्ति। अत कथ्यते - **ब्राह्मणं नाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यानग्रन्थः**[१३]। तस्यैव ब्राह्मणात्मकस्यापौरुषेयस्य वेदस्य व्याख्यां भाष्यं वाऽऽश्रित्यान्येपि सिद्धान्ताः भाष्यावतरणस्य संस्कृतसाहित्यक्षेत्रे परम्परामधिगताः। अतः आचार्यसायणानुसारं ब्राह्मणभागोऽपि नित्यः शाश्वतः अपौरुषेयश्च वर्तते।

## ४. ऋषि-छन्दो-देवतादिविचारः

मन्त्रार्थज्ञानाय ऋषि-छन्द-देवता-स्वरादिज्ञानमपेक्षितं नोचेत् स पापीयान् भवतीति आचार्यसायणः कथयति, यथा-

> **अविदित्वा ऋषिंछन्दो दैवतं योगमेव च।**
> **योऽध्यापयेज्जपेद् वापि पापीयाञ्जायते तु सः॥**

---

[११] मन्त्रब्राह्मणयोर्वेदनामधेयम् – आपस्तबपरिभाषा-१.३३

[१२] जैमिनि-१/१/३०-३१

[१३] भट्ट भास्कर – तै.सहिता-१/५/१ भाष्य

Scanned with CamScanner

**ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वराद्यपि।**
**अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते॥**[१४]

ऋग्वेदभाष्ये आचार्यसायणः कथयति – **'अग्निमित्यादिसूक्तस्य छन्दोऽनुक्रमणिकायां यद्यप्यत्र नोक्तं तथापि परिभाषायामेवमुक्तम् – आदौ गायत्रं प्राग्घिरण्यस्तूपात्'**[१५] इति। हिरण्यस्तूप ऋषिर्येषां मन्त्राणां वक्ष्यते ततः प्राचीनेषु मन्त्रेषु सामान्येन गायत्रं छन्द इत्यर्थः। छन्दसः प्रयोजनविषये आचार्यः कथयति ऐतरेय अरण्यकाण्डभाष्ये – **'छादयन्ति ह वा एनं छन्दांसि पापात् कर्मणः'**[१६] इति। पुरुषस्य पापसम्बन्धं वारयितुमाच्छादकत्वाच्छन्द इत्युच्यते। छन्दोज्ञानेनापि देवताज्ञानं भवतीति सायणस्य मतम्।

छन्दस्स्वरूपप्रतिपादनानन्तरम् अर्थज्ञानार्थं देवताज्ञानस्यापि आवश्यकता अस्तीति सायणः प्रतिपादयति। पुनः यदि देवताज्ञानं न भवति चेत् यागसम्पादने काठिन्यं भवति। अतः कथ्यते –

**वेदितव्यं हि दैवत्यं मन्त्रे मन्त्रे प्रयत्नतः।**
**दैवतज्ञो हि मन्त्राणां तदर्थमधिगच्छति॥**[१७]

**न कश्चिदविज्ञाय याथातथ्येन दैवतम्।**
**लौक्यानां वैदिकानां वा कर्मणां फलमश्नुते॥**[१८]

**तत्र तत्र यथावच्च मन्त्रान्कर्मसु योजयेत्।**
**देवतायाः परिज्ञानात् तद्धिकर्म समृद्ध्यते॥**[१९]
**यस्य यस्य तु मन्त्रस्य उद्दिष्टं देवता तु या।**
**तदाकारो भवेत्तस्य देवत्त्वं देवतोच्यते॥**

उपर्युक्तप्रमाणैः कर्मसमृद्धये अर्थज्ञानाय च मन्त्रेषु देवतायाः ज्ञानं परमावश्यकमिति ज्ञायते। आचार्यसायणोऽपि कथयति – **'दिवा वै नोऽभूदिति तद्देवानां देवत्वम्'**२० इति।

---

[१४] ऋग्वेद- १/१/१ मन्त्रभूमिकायाम् (सायणभाष्यम्)
[१५] छन्दोऽनुक्रमणिका – १२/१४
[१६] ऐ.आ. -२/५
[१७] बृहद्देवता – १/२
[१८] बृहद्देवता – १/४
[१९] बृहद्देवता – १/२१
[२०] सायणभाष्यम् – ऋ.-१/१/१

Scanned with CamScanner

अर्थज्ञानाय ऋषिज्ञानमपि सहायकं भवतीति सायणस्य मतम्। यथा- 'येन येनर्षिणा यस्य यस्य मन्त्रस्यार्थः प्रकाशितोऽस्ति तस्य तस्य ऋषेरेकैकस्य मन्त्रस्य सम्बन्धे नामोल्लेखः कृतोऽस्ति। तथा यस्य यस्य मन्त्रस्य यो योऽर्थोऽस्ति, सः सोऽर्थस्तस्य तस्य देवताशब्देनाभिप्रायार्थविज्ञापनार्थं प्रकाश्यते। एतदर्थं देवताशब्दलेखनं कृतम्। एवञ्च यस्य यस्य मन्त्रस्य गायत्र्यादिछन्दोऽस्ति तत्तद्विज्ञानार्थं छन्दोलेखनम्'[२१] इति। अपि च -

**अर्थज्ञान ऋषिज्ञानं भूयिष्ठमुपकारकम्।**
**वक्ष्यन्त ऋषयस्तस्मात् स्वरूपस्थास्तु देवताः॥**[२२] इति।

पुनश्च आचर्यवेङ्कटमाधवेनापि आर्षगोत्रऋषीणां सम्बन्धे कथयति –

**ऋषीणामार्षगोत्राणां ज्ञानमायुष्यमुच्यते।**
**पुत्र्यं पुण्यं यशस्यं च स्वर्ग्यं धन्यममित्रहम्॥**

**मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविद् न यः।**
**याजानाध्यापनाद्देति छन्दसां यातयामताम्॥**

**मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतवित् तु यः।**
**याजनाध्यापनाभ्यां स श्रेय एवाधिगच्छति॥**[२३]

## ५. स्वर-वर्ण-अक्षर-विनियोग-अर्थादिविचारः

ऋग्वेदभाष्ये आचार्यसायणः कथयति मन्त्रार्थज्ञानाय स्वर-वर्ण-अक्षर-विनियोग-अर्थादिज्ञानमपेक्षितं वर्तते। यथा-

**स्वरो वर्णोऽक्षरं मात्रा विनियोगोऽर्थ एव च।**
**मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे॥**[२४]

आचार्यसायणः मन्त्रार्थस्य पूर्वं विनियोगस्य संकेतं स्वकीयभाष्ये करोति। आचार्ययास्केनापि निरुक्ते उच्यते - 'तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन विकारेणान्वितौ स्यातां तथा तानि निर्ब्रूयात्। अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत। केनचिद् वृत्तिसामान्येन। अविद्यमाने

---

[२१] ऋग्वेदभाष्यभूमिका - प्रश्नोत्तरविषयः

[२२] प्रथमाष्टकस्य भूमिकात्मककारिकाम्

[२३] पञ्चमाष्टक, प्रथमाध्यायस्य भूमिकात्मिका कारिकायाम्

[२४] सायण, ऋ.-१/१/१ मन्त्रस्य भूमिकायाम्

Scanned with CamScanner

सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्। नत्वेवं न निर्ब्रूयात्।'[२५] ऋग्वेदस्य भाष्यकारः स्कन्दस्वामी प्रथममन्त्रस्य व्याख्यानावसरे लिखति- "ऋषिराद्यो मधुच्छन्दाः वैश्वामित्रः। ऋग्वेदस्याद्य ऋषिर्मधुच्छन्दा नाम। विश्वामित्रस्य पुत्रः। आग्नेयं प्रथमं सूक्तं मधुच्छन्दस आदितः, मधुच्छन्दस ऋषेरादौ यत् सूक्तम् ऋग्वेदस्य प्रथमं तदग्निदैवतम्।[२६]

इदानीम् अचार्यसायणस्य भाष्यप्रवृत्तिविषये मन्त्रार्थविषयकसिद्धान्तविषये वा केचन बिन्दवः अत्र उपस्थाप्यन्ते।

### १. विनियोगः

सायणस्य मन्त्रार्थपद्धतिः याज्ञिकाऽस्ति। अतः स्वाभाविकरूपेण विनियोगस्योल्लेखो दृश्यते। उदाहरणरूपेण ऋग्वेदस्य प्रथममन्त्रस्य विनियोगरूपेणाचार्यः कथयति-

'अग्निमीळे' इति सूक्तं प्रातरनुवाके आग्नेये क्रतौ विनियुक्तम्। स विनियोग आश्वालायनेन चतुर्थाध्यायस्य त्रयोदशे खण्डे सूत्रितः – 'अवा नो अग्न इति षळग्निमीळेऽग्निं दूतम्' इति। तत्र हीनपादग्रहणात् सूक्तनिश्चयः। 'सूक्तं सूक्तादौ हीने पादे'[२७] इति परिभाषितत्वात्। तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः।

उपर्युक्तविवरणेन स्पष्टं भवति यत् आचार्यसायणः आश्वालायनश्रौतसूत्राधारेण 'अग्निमीळे' इति मन्त्रस्य विनियोगः याज्यारूपेण कृतः। यत्र कुत्रापि यज्ञपरकव्याख्यां कर्तुमसमर्थो भवति तत्र 'गतो विनियोगः'[२८] इत्युक्त्वा अग्रे सरति।

### २. अर्थकौशलम्

आचार्यसायणः यज्ञप्रक्रियायाः न तु केवलं मर्मज्ञ आसीत् अपितु मन्त्रार्थकरणेऽपि कुशलः आसीत्। उदाहरणरूपेण एको मन्त्रः प्रस्तूयते –

**अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।**
**होतारं रत्नधातमम्॥**[२९]

---

[२५] निरुक्तम्- २/१
[२६] स्कन्दभाष्यम्, ऋग्वेद-१/१/१
[२७] आश्वा.श्रौत. १/१
[२८] ऋग्वेदः- १०/१२९ सूक्तस्य प्रारम्भे
[२९] ऋग्वेदः -१/१/१

Scanned with CamScanner

अत्र द्वितीयमन्त्रे 'चोदयित्री सूनृतानाम्' इति पदभाष्ये सरस्वती वाग्रूपा इति भाष्यं करोति। तृतीयमन्त्रे 'अर्ण' इति पदस्यार्थः उदकम् इति करोति। यद्यपि आचार्यदयानन्दादयः केचन भाष्यकाराः वाग्रूपा सरस्वतीति कथयन्ति। परन्तु यास्काचार्यः निरुक्ते कथयति –

'वाङ्नामान्युत्तराणि सप्तपञ्चाशत्। वाक् कस्मात्? वचेः। तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति। तद् यद्देवतावदुपरिष्टात् तद्व्याख्यास्यामः। अथैतन्नदीवत्।'[33] इति।

अनेन स्पष्टं भवति सायणभाष्ये आचार्ययास्कस्य निरुक्तस्य प्रभावो दृश्यते। आचार्यसायणस्य भाष्येषु कुत्रचित् आधिदैवतपरकव्याख्याऽपि दृश्यते[34]। कुत्रापि आध्यात्मिकपरकव्याख्याऽपि वर्तते३५। परन्तु अत्रावधेयमस्ति यत् यत्र याज्ञिकपक्षे भाष्यकरणं अनुरूपं न भवति तत्र मन्त्रार्थशैलीमाश्रित्यभाष्यं कृतं तेन।

निष्कर्षरूपेण वक्तुं शक्यते यत् वेदानुशीलनं हि नाम भारतीयानां विद्वज्जनानां प्रथमं कर्तव्यम्। वेदानां ते एव अर्थाः समुचिताः ये पूर्वाचार्यकृतां परम्परानुसरन्ति। निरुक्ते परम्परायास्तस्याः स्थितिं वयमवलोकयामः। तत्रत्यानि व्याख्यानानि प्रमाणरूपतां भजन्ते इति निर्विवादम्। परम्पराविरहितो वेदार्थो न खलु कदापि विद्वज्जनैरनुसन्धेयः। किन्तु उपर्युक्तैः सविस्तरविवेचनैः सायणाचार्यस्य मन्त्रार्थदृष्टिर्विषये निगदितुं शक्यते यत् तेन कृतानां मन्त्राणामर्थप्राक् यदिंगितं तद्वत् कर्मकाण्डनिष्ठं वेदभाष्यं विहितम्। आचार्यसायणेनैव भाष्यावसरे सोदाहरणम् उद्घोषितं प्रबोधितं च यत् कस्मिन्नपि स्थले इतिहासस्य प्रतीतिः स्यात् तन्नेतिहासमिति जानीयात् स्वेन प्रस्थापितस्य मापदण्डस्य सम्यक्तया परिपालयितुं प्रयत्ने कृते सत्यपि मध्यकालयुगस्य प्रभावेण संपृक्तोपि जातः।

अतः साम्प्रतं वेदस्याधिगमे विश्वमानवाः सायणाचर्यस्य मन्त्रार्थदृष्टिमनुसरन्ति। मतैक्याभावेनापि आधुनिकाः भाष्यकाराः सायणभाष्यस्याश्रयम् एव अङ्गीकुर्वन्ति। अनेनाचार्यस्य महत्ता प्रस्फुटति। यद्यपि वर्तमानकाले नैकानि वेदभाष्याणि समुपलभ्यन्ते तथापि सायणाचार्यस्य भाष्याधिगमं विना अपूर्णतामनुभूयते पाठकैः। आचार्यसायणेन तच्छिखरं समलंकृतमस्ति तँल्लब्धुं नैव पारयन्ति विद्वांसो वेदभाष्यकाराः आधुनिकाश्च।

---

[33] निरुक्तम् – २/२३

[34] ऋग्वेदः -१/१६४/२१

[35] ऋग्वेदः – १/१६४/१६

Scanned with CamScanner

**सहायकग्रन्थाः**

१. ऋग्वेद के भाष्यकार और उनकी मन्त्रार्थदृष्टि
२. केचन वेदभाष्यकाराः धर्ममनीषिणश्च
३. सायणभाष्यम् (संहिताग्रन्थाः-५)
४. सायणभाष्यम् (ब्राह्मणारण्यकग्रन्थाः-१३)

* * *

Scanned with CamScanner